भिदकं, क्ली, (भिनत्तीति । भिद् + "बहुलमन्यत्रापि ।" उणा० २।३७। इति वुन् ।) वज्रम् । खड्गे, पुं । इत्युणादिकोषः ॥

भिदा, स्त्री, (भेदनमिति भिद् + "षिद्भिदादिभ्योऽङ् ।" ३।३।१०४। इति । अङ् । टाप् ।) वस्त्रादेर्विदारणम् । चेरा इति भाषा । तत्पर्य्यायः । विदरः २ स्फुटनम् ३ । इत्यमरः । ३।२।५॥ धन्याकम् । इति शब्दचन्द्रिका ॥ भेदः । यथा । प्रायश्चित्तस्य पूर्व्वाह्णत्वं वाक्यभिदा तथा । इति प्रायश्चित्ततत्त्वम् ॥

भिदिः, पुं, (भिनत्तीति । भिद् + "कृगॄशॄपॄकुटिभिदिच्छिदिभ्यश्च ।" उणा० ४ । १४२ । इति इः । स च कित् ।) वज्रम् । इति द्विरूपकोषः ॥

भिदिरं, क्ली, (भिनत्ति विदारयतीति । भिद् + "इषिमदिमुदिखिदिच्छिदिभिदिमन्दीति ।" उणा० १ । ५२ । इति किरच् ।) वज्रम् । इत्यमरटीकायां भरतः त्रिकाण्डशेषश्च ॥

भिदुः, पुं, (भिनत्ति विदारयतीति । भिद् + "पॄभिदिव्यधिगृधिधृषिहृषिभ्यः ।" उणा० १ । २४ । इति कुः ।) वज्रम् । इति त्रिकाण्डशेषः ॥

भिदुरं, क्ली, (भिनत्तीति । भिद् + "विदिभिदिच्छिदेः कुरच् ।" ३। २ ।१६२। इति । कुरच् ।) वज्रम् । इत्यमरः । १ । १ । ५० ॥ प्लक्षवृक्षे पुं । इति राजनिर्घण्टः ॥

भिद्यः, पुं, (भिनत्ति कूलमिति । भिद् + "भिद्योद्ध्यौ नदे ।" ३ । १ । ११५ । इति क्यप् । निपातितश्च ।) नदः । इति हेमचन्द्रः ॥ मुग्धबोधव्याकरणञ्च ॥ (यथा, भट्टौ । ६ । ५६ ।
"समुत्तरन्तावथ तौ नदान् भिद्योद्ध्यसन्निभान् ।
सिध्यतारामिव ख्यातां शबरीमापतुर्वने ॥")

भिद्रः, पुं, क्ली, (भिनत्तीति । भिद् "स्फायितञ्चिवञ्चिशकिक्षिपिक्षुदिसृपितृपीति ।" उणा० २ । १३ । इति रक् ।) वज्रम् । इति त्रिकाण्डशेषः उणादिकोषश्च ॥

भिन्दिपालः, पुं, (भिन्दि + इन् । भिन्दिं विदारणं पालयतीति पालि + अण् ।) हस्तप्रमाणकाण्डः । नालिकास्त्रमिति ख्यातम् । इति भरतः ॥ हस्तक्षेप्यलगुडः । इति स्वामी ॥ तत्पर्य्यायः । सृगः २ । इत्यमरः । २ । ८ । ९१ ॥ (यथा, वैशम्पायनसंहितायाम् । ३ ।
"भिन्दिपालस्तु वक्राङ्गो नम्रशीर्षो बृहच्छिराः ।
हस्तमात्रोत्सेधयुक्तः करसम्मितमण्डलः ॥"
भिण्डिवालः भिन्दिवालश्चापि इत्येवं पाठद्वयं दृश्यते ।)

भिन्नः, त्रि, (भिद्यते स्मेति । भिद् + क्तः ।) भेदविशिष्टः । भाङ्गा इति भाषा । तत्पर्य्यायः । दारितः २ । भेदितः ३ । इत्यमरः । ३।१।१०० ॥ विदारितः ४ । इति शब्दरत्नावली ॥ (यथा, हरिवंशे । भविष्यपर्व्वणि । ५३ । १६ ।
"भ्रान्तमुद्भ्रान्तमाविद्धं प्रविद्धं बहुनिःसृतम् ।
आकरं विकरं भिन्नं निर्मर्य्यादममानुषम् ॥")
सङ्गतः । अन्यः । फुल्लः । इति मेदिनी । ने, १४ ॥ क्षतरोगविशेषः । तल्लक्षणं यथा,—
"शक्तिकुन्तेषु खड्गाग्रविषाणैराशयो हतः ।
यत्किञ्चित् प्रस्रवेत्तद्धि भिन्नमित्यभिधीयते ॥"
आशयः कोष्ठः । तस्यौषधं यथा,—
"छिन्ने भिन्ने तथा विद्धे क्षते शास्त्रगतिस्रवेत् ।
रक्तक्षयात्तत्र रुजः करोति पवनो भृशम् ॥
स्नेहपानपरीषेकलेपांस्तत्रोपनाहनम् ।
कुर्व्वीत स्नेहबस्तिञ्च मारुतघ्नौषधैर्भिषक् ॥
खड्गादिच्छिन्नगात्रस्य तत्कालं पूरितो व्रणः ।
गाङ्गेरुकीबलारसैः सद्यः स्याद्गतवेदनः ॥
कषायमधुराः शीताः क्रियाः सर्व्वाः प्रयोजयेत् ।
सद्यो व्रणानां सप्ताहात् पश्चात् पूर्व्वोक्तमाचरेत् ॥
आमाशयस्थे रुधिरे विदध्याद्वमनं नरः ।
तस्मिन् पक्वाशयस्थे तु युञ्जीयात् सविरेचनम् ॥
क्वाथो वंशत्वगेरण्डश्वदंष्ट्राश्मभिदा कृतः ।
हिङ्गुसैन्धवसंयुक्तः कोष्ठस्थं स्रावयेदसृक् ॥
यवकोलकुलत्थानां निःस्नेहेन रसेन च ।
भुञ्जीतान्नं यवागूं वा पिबेत् सैन्धवसंयुताम् ॥
जातीनिम्बपटोलपत्रकटुकादार्व्वीनिशाशारिवा
मञ्जिष्ठाभयतिक्ततुत्थमधुकैर्नक्ताह्वबीजैः समैः ।
सर्पिःसिद्धमनेन सूक्ष्मवदना मर्म्माश्रिताः स्राविणो
गम्भीराः सरुजो व्रणाः सगतिकाः शुध्यन्ति रोहन्ति च ॥
वृद्धवैद्योपदेशेन पारम्पर्य्योपदेशतः ।
जातीघृते तु संसिद्धे क्षेप्यं सिक्थकं बुधैः ॥"
जात्यादिघृतम् । इति भावप्रकाशः ॥ * ॥
(अथोपाङ्गचिकित्सा ।
"छिन्नं भिन्नं तथा भग्नं क्षतं पिच्छितमेव च ॥
इत्यन्तेषां प्रतीकारः प्रोक्तश्चोपाङ्गसंज्ञकः ॥"
इति हारीते प्रथमे स्थाने द्वितीयेऽध्याये ॥)

भिन्नकः, पुं, (भिन्न + संज्ञायां कन् ।) बौद्धः । यथा,
"भिन्नकः क्षपणोऽह्रीको बौद्धो वैनायिकः स्मृतः ॥"
इति त्रिकाण्डशेषः ॥
(भिन्न + "अनत्यन्तगतौ क्तात् ।" ५ । ४ । ४ । इति कन् । ईषद् भिन्ने, त्रि ।)

भिन्नगात्रिका, स्त्री, (भिन्नं गात्रमस्याः । कप् । टाप् । अत इत्वम् ।) कर्कटी । इति शब्दचन्द्रिका ॥

भिन्नभिन्नात्मा, [न्] पुं, (भिन्नश्छिन्नो भेदयुक्त आत्मा यस्य ।) चणकः । इति शब्दचन्द्रिका ॥

भिन्नयोजनी, स्त्री, (भिन्नं योजयतीति । युज् + णिच् + णिनिः । ङीप् ।) पाषाणभेदकवृक्षः । इति भावप्रकाशः ॥

भिन्नार्थकः, त्रि, (भिन्नोऽर्थो यस्य । कप् ।) अन्यः । इत्यमरः । ३ । १ । ८२ ॥

भिया, स्त्री, (भीयते इति । भी + "षिद्भिदादिभ्योऽङ् ।" ३ । ३ । १०४ । इति अङ् । इयङ् । टाप् ।) भयम् । इति हेमचन्द्रः । २ । २०१ ॥

भिरिण्टिका, स्त्री, श्वेतगुञ्जा । इति राजनिर्घण्टः ॥

भिल्ल, पुं, (भेलयति भिलत्तीति वा । भिल् + बाहुलकात् । लक् ।) म्लेच्छजातिविशेषः । भील इति भाषा । यथा, हेमचन्द्रे ।
"माला भिल्लाः किराताश्च सर्व्वेऽपि म्लेच्छजातयः ॥"
अपि च ।
"रजकश्चर्म्मकारश्च नटो वरुड़ एव च ।
कैवर्त्तमेदभिल्लाश्च सप्तैते चान्त्यजाः स्मृताः ॥"
इति प्रायश्चित्ततत्त्वम् ॥
स च ब्राह्मणकन्यायां तीवराज्जातः । यथा,—
"पुलिन्दमेदभिल्लाश्च पुक्को मल्लश्च धावकः ।
कुन्दकारो डोखलो वा मत्तपो हस्तिपस्तथा ।
एते वै तीवराज्जाताः कन्यायां ब्राह्मणस्य च ॥"
इति पराशरपद्धतिः ॥

भिल्लगवी, स्त्री, (भिल्लानां गवी ।) गवयी । इति राजनिर्घण्टः ॥

भिल्लतरुः, पुं, (भिल्लप्रियस्तरुः । लोध्रपुष्पेण हि भिल्लादयोऽङ्गभूषणादिकं कुर्व्वन्तीति प्रसिद्धेरस्य तथात्वम् ।) लोध्रः । इति राजनिर्घण्टः ॥

भिल्ली, स्त्री, (भिल्ल + ङीप् । भिल्लानां प्रियत्वादस्यास्तथात्वम् ।) लोध्रः । इति राजनिर्घण्टः ॥

भिष्, रुग्जये । सौत्रधातुरयम् । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) भिषक् भेषजं भेषति । इति दुर्गादासः ॥

भिषक्, [ज्] बिभेति रोगो यस्मादिति । भीलि भीत्याम् + "भियः षुक् ह्रस्वश्च ।" उणा० १ । १३७ । इति अजिः षुगागमो ह्रस्वत्वञ्च ।) वैद्यः । इत्यमरः । २ । ६ । ५७ ॥ (अस्य प्राशस्त्यादिकं यथा,—
"भिषग्बुभूषुर्मतिमान् अतः स्वगुणसम्पदि ।
परं प्रयत्नमातिष्ठेत् प्राणदः स्याद् यथा नृणाम् ॥
तदेव युक्तं भैषज्यं यदारोग्याय कल्पते ।
स चैव भिषजां श्रेष्ठो रोगेभ्यो यः प्रमोचयेत् ॥
सम्यक् प्रयोगं सर्व्वेषां सिद्धिराख्याति कर्म्मणाम् ॥
सिद्धिराख्याति सर्व्वैश्च गुणैर्युक्तं भिषक्तमम् ॥"
इति चरके सूत्रस्थाने प्रथमेऽध्याये ॥
"एतदवश्यमध्येयमधीत्य च कर्म्माप्यवश्यमुपासितव्यमुभयज्ञो हि भिषग्राजार्हो भवति ॥"
यस्तु केवलशास्त्रज्ञः कर्म्मस्वपरिनिष्ठितः ।
स मुह्यत्यातुरं प्राप्य प्राप्य भीरुरिवाहवम् ॥
यस्तु कर्म्मसु निष्णातो धार्ष्ट्याच्छास्त्रबहिष्कृतः ।
स सत्सु पूजां नाप्नोति वधञ्चार्हति राजतः ॥
उभावेतावनिपुणावसमर्थौ स्वकर्म्मणि ।
अर्द्धवेदधरावेतावेकपक्षाविव द्विजौ ॥
ओषध्योऽमृतकल्पास्तु शस्त्राशनिविषोपमाः ।
भवन्त्यज्ञैरुपहृतास्तस्मादेतौ विवर्ज्जयेत् ॥
स्नेहादिष्वनभिज्ञो यः स्वेदादिषु च कर्म्मसु ।
स निहन्ति जनं लोभात् कुवैद्यो नृपदोषतः ॥
यस्तूभयज्ञो मतिमान् स समर्थोऽर्थसाधने ।
आहवे कर्म्म निर्वोढुं द्विचक्रः स्यन्दनो यथा ॥"
इति सुश्रुते सूत्रस्थाने तृतीयेऽध्याये ॥)